# अथ नलोपाख्यानम्

atha nalopākhyānam

## बृहदश्व उवाच

bṛhadaśva uvāca

आसीद् राजा नलो नाम वीरसेनसुतो बली

āsīd rājā nalo nāma vīrasenasuto balī

उपपन्नो गुणैर् इष्टै रूपवान् अश्वकोविदः

upapanno guṇair iṣtai rūpavān aśvakovidaḥ

अतिष्ठन् मानुजेन्द्राणां मूर्ध्नि देवपतिर् यथा

atiṣṭhan mānujendrāṇāṃ mūrdhni devapatir yathā

उपर्य् उपरि सर्वेषाम् आदित्य इव तेजसा

upary upari sarveṣām āditya iva tejasā

ब्रह्मण्यो वेदविच् छूरो निषधेषु महीपतिः

brahmaṇyo vedavic chūro niṣadheṣu mahīpatiḥ

अक्षप्रियः सत्यवादी महान् अक्षौहिणीपतिः

akṣapriyaḥ satyavādī mahān akṣauhiṇīpatiḥ

ईप्सितो नरनारीणाम् उदारः संयतेन्द्रियः

īpsito naranārīṇām udāraḥ saṃyatendriyaḥ

रक्षिता धन्विनां श्रेष्ठः साक्षाद् इव मनुः स्वयम्

rakṣitā dhanvināṃ śreṣṭhaḥ sākṣād iva manuḥ svayam

तथैवासीद् विदर्भेषु भीमो भीमपराक्रमः

tathaivāsīd vidarbheṣu bhīmo bhīmaparākramaḥ

शूरः सर्वगुणैर् युक्तः प्रजाकामः स चाप्रजः

śūraḥ sarvaguṇair yuktaḥ prajākāmaḥ sa cāprajaḥ

स प्रजार्थे परं यत्नम् अकरोत् सुसमाहितः

sa prajārthe paraṃ yatnam akarot susamāhitaḥ

तम् अभ्यगच्छद् ब्रह्मर्षिर् दमनो नाम भारत

tam abhyagacchad brahmarṣir damano nāma bhārata

तं स भीमः प्रजाकामस् तोषयामास धर्मवित्

taṃ sa bhīmaḥ prajākāmas toṣayāmāsa dharmavit

महिष्या सह राजेन्द्र सत्कारेण सुवर्चसम्

mahiṣyā saha rājendra satkareṇa suvarcasam

तस्मै प्रसन्नो दमनः सभार्याय वरं ददौ

tasmai prasanno damanaḥ sabhāryāya varaṃ dadau

कन्यारत्नं कुमारांश् च त्रीन् उदारान् महायशाः

kanyāratnaṃ kumārāṃś ca trīn udārān mahāyaśāḥ

दमयन्तीं दमं दान्तं दमनं च सुवर्चसम्

damayantīṃ damaṃ dāntaṃ damanaṃ ca suvarcasam

उपपन्नान् गुणैः सर्वैर् भीमान् भीमपराक्रमान्

upapannān guṇaiḥ sarvair bhīmān bhīmaparākramān

दमयन्ती तु रूपेण तेजसा यशसा श्रिया

damayantī tu rūpeṇa tejasā yaśasā śriyā

सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा

saubhāgyena ca lokeṣu yaśāḥ prāpa sumadhyamā

अथ तां वयसि प्राप्ते दासीनां समलंकृतम्

atha tāṃ vayasi prāpte dāsīnāṃ samalaṃkṛtam

शतं शतं सखीनां च पर्युपासच् छचीम् इव

śataṃ śataṃ sakhīnāṃ ca paryupāsac chacīm iva

तत्र स्म राजते भैमी सर्वाभरणभूषिता

tatra sma rajate bhaimī sarvābharaṇabhūṣitā

सखीमध्ये ऽनवद्याङ्गी विद्युत् सौदामनी यथा

sakhīmadhye 'navadyāṅgī vidyut saudāmanī yathā

अतीव रूपसंपन्ना श्रीर् इवायतलोचना
atīva rūpasaṃpannā śrīr ivāyatalocanā

न देवेषु न यक्षेषु तादृग् रूपवती क्व चित्
na deveṣu na yakṣeṣu tādṛg rūpavatī kva cit

मानुषेष्व् अपि चान्येषु दृष्टपूर्वाथ वा श्रुता
mānuṣeṣv api cānyeṣu dṛṣṭapūrvātha vā śrutā

चित्तप्रमाथिनी बाला देवानाम् अपि सुन्दरी
cittapramāthinī bālā devānām api sundarī

नलश् च नरशार्दूलो लोकेष्व् अप्रतिमो भुवि
nalaś ca naraśārdūlo lokeṣv apratimo bhuvi

कन्दर्प इव रूपेण मूर्तिमान् अभवत् स्वयम्
kandarpa iva rūpeṇa mūrtimān abhavat svayam

तस्याः समीपे तु नलं प्रशशंसुः कुतूहलात्
tasyāḥ samīpe tu nalaṃ praśaśaṃsuḥ kutūhalāt

नैषधस्य समीपे तु दमयन्तीं पुनः पुनः
naiṣadhasya samīpe tu damayantīṃ punaḥ punaḥ

तयोर् अदृष्टकामो ऽभूच् छृण्वतोः सततं गुणान्
tayor adṛṣṭakāmo 'bhūc chṛṇvatoḥ satataṃ guṇān

अन्योन्यं प्रति कौन्तेय स व्यवर्धत हृच्छयः
anyonyaṃ prati kaunteya sa vyavardhata hṛcchayaḥ

अशक्नुवन् नलः कामं तदा धारयितुं हृदा
aśaknuvan nalaḥ kāmaṃ tadā dhārayituṃ hṛdā

अन्तःपुरसमीपस्थे वन आस्ते रहो गतः
antaḥpurasamīpasthe vana āste raho gataḥ

स ददर्श ततो हंसाञ् जातरूपपरिष्कृतान्
sa dadarśa tato haṃsāñ jātarūpapariṣkṛtān

वने विचरतां तेषाम् एकं जग्राह पक्षिणम्

vane vicaratāṃ teṣām ekaṃ jagrāha pakṣiṇam

ततो ऽन्तरिक्षगो वाचं व्याजहार नलं तदा

tato 'ntarikṣago vācaṃ vyājahāra nalaṃ tadā

हन्तव्यो ऽस्मि न ते राजन् करिष्यामि तव प्रियम्

hantavyo 'smi na te rājan kariṣyāmi tava priyam

दमयन्तीसकाशे त्वां कथयिष्यामि नैषध

damayantīsakāśe tvāṃ kathayiṣyāmi naiṣadha

यथा त्वद् अन्यं पुरुषं न सा मंस्यति कर्हि चित्

yathā tvad anyaṃ purūṣaṃ na sā maṃsyati karhi cit

एवम् उक्तस् ततो हंसम् उत्ससर्ज महीपतिः

evam uktas tato haṃsam utsasarja mahīpatiḥ

ते तु हंसाः समुत्पत्य विदर्भान् अगमंस् ततः

te tu haṃsāḥ samutpatya vidarbhān agamaṃs tataḥ

विदर्भनगरीं गत्वा दमयन्त्यास् तदान्तिके

vidarbhanagarīṃ gatvā damayantyās tadāntike

निपेतुस् ते गरुत्मन्तः सा ददर्श च तान् गणान्

nipetus te garutmantaḥ sā dadarśa ca tān gaṇān

सा तान् अद्भुतरूपान् वै दृष्ट्वा सखिगणवृता

sā tān adbhutarūpān vai dṛṣṭvā sakhigaṇavṛtā

हृष्टा ग्रहीतुं खगमांस् त्वरमाणोपचक्रमे

hṛṣṭa grahītuṃ khagamāṃs tvaramāṇopacakrame

अथ हंसा विससृपुः सर्वतः प्रमदावने

atha haṃsā visasṛpuḥ sarvataḥ pramadāvane

एकैकशस् तदा कन्यास् तान् हंसान् समुपाद्रवन्

ekaikaśas tadā kanyās tān haṃsān samupādravan

दमयन्ती तु यं हंसं समुपाधवद् अन्तिके

damayantī tu yaṃ haṃsaṃ samupādhavad antike

स मानुषीं गिरं कृत्वा दमयन्तीम् अथाब्रवीत्

sa mānuṣīṃ giraṃ kr̥tvā damayantīm athābravīt

दमयन्ति नलो नाम निषधेषु महीपतिः

damayanti nalo nāma niṣadheṣu mahīpatiḥ

अश्विनोः सदृशो रूपे न समास् तस्य मानुषाः

aśvinoḥ sadr̥śo rūpe na samās tasya mānuṣāḥ

तस्य वै यदि भार्या त्वं भवेथा वरवर्णिनि

tasya vai yadi bhāryā tvaṃ bhavetha varavarṇini

सफलं ते भवेज् जन्म रूपं चेदं सुमध्यमे

saphalaṃ te bhavej janma rūpaṃ cedaṃ sumadhyame

वयं हि देवगन्धर्वमानुषोरगराक्षसान्

vayaṃ hi devagandharvamānuṣoragarākṣasān

दृष्टवन्तो न चास्माभिर् दृष्टपूर्वस् तथाविधः
dṛṣṭavanto na cāsmābhir dṛṣṭapūrvas tathāvidhaḥ

त्वं चापि रत्नं नारीणां नरेषु च नलो वरः
tvaṃ cāpi ratnaṃ nārīṇāṃ nareṣu ca nalo varaḥ

विशिष्टाया विशिष्टेन संगमो गुणवान् भवेत्
viśiṣṭāyā viśiṣṭena saṃgamo guṇavān bhavet

एवम् उक्ता तु हंसेन दमयन्ती विशां पते
evam uktā tu haṃsena damayantī viśāṃ pate

अब्रवीत् तत्र तं हंसं त्वम् अप्य् एवं नले वद
abravīt tatra taṃ haṃsaṃ tvam apy evaṃ nale vada

तथेत्य् उक्त्वाण्डजः कन्यां विदर्भस्य विशां पते
tathety uktvāṇḍajaḥ kanyāṃ vidarbhasya viśāṃ pate

पुनर् आगम्य निषधान् नले सर्वं न्यवेदयत्
punar āgamya niṣadhān nale sarvaṃ nyavedayat

इति नलोपाख्याने प्रथमः सर्गः
iti nalopākhyāne prathamaḥ sargaḥ